# श्री नृसिंहस्तुतिः

उदयरविसहस्रद्योतितं रूक्षवीक्षं
प्रलयजलधिनादं कल्पकृद्वह्निवक्त्रम ।
सुरपतिरिपुवक्षश्छेदरक्तोक्षितांगं
प्रणतभयहरं तं नारसिंहं नतोऽस्मि ॥)

प्रलयरविकरालाकाररुक्चक्रवालं
विरलयदुरुरोचीरोचिताशांतराल ।
प्रतिभयतमकोपात्युत्कटोच्चाट्टहासिन
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १ ॥

सरसरभसपादापातभाराभिराव-
प्रचकितचलसप्तद्वंद्वलोकस्तुतस्त्वम ।
रिपुरुधिरनिषेकेणेव शोणांघ्रिशालिन
दह दह नरसिंहासह्यवीर्याहितं मे ॥ २ ॥

तव घनघनघोषो घोरमाघ्राय जंघा-
परिघमलघुमूरुव्याजतेजोगिरिं च ।
घनविघटितमागाद्दैत्यजंघालसंघो
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ३ ॥

कटकिकटकराजद्धाटकाग्र्यस्थलाभा
प्रकटपटतटित तॆ सत्कटिस्थाऽतिपट्वी ।
कटुककटुकदुष्टाटॊपदृष्टिप्रमुष्टौ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ४ ॥

प्रखरनखरवज्रॊत्खातरूक्षारिवक्षः-
शिखरिशिखररक्तैराक्तसंदॊहदॆह ।
सुवलिभ शुभकुक्षॆ भद्रगंभीरनाभॆ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ५ ॥

स्फुरयति तव साक्षात सैव नक्षत्रमाला
क्षपितदितिजवक्षॊव्याप्तनक्षत्रमार्गम ।
अरिदरधर जान्वासक्तहस्तद्वयाहॊ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ६ ॥

कटुविकटसटौघॊद्घट्टनाद्भ्रष्टभूयॊ
घनपटलविशालाकाशलब्धावकाशम ।
करपरिघविमर्दप्रॊद्यमं ध्यायतस्तॆ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ७ ॥

www.yousigma.com

हठलुठदलघिष्ठॊत्कंठ दष्टॊष्ठ विद्युत्सट
शठकठिनॊरःपीठभित सुष्ठु निष्ठाम ।
पठति नु तव कंठाधिष्ठघॊरांत्रमाला
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ८ ॥

हृतबहुमिहिराभासह्यसंहाररंहॊ-
हुतवहबहुहॆतिह्रॆपिकानंतहॆति ।
अहितविहितमॊहं संवहन सैंहमास्यं
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ९ ॥

गुरुगुरुगिरिराजत्कृंदरांतर्गतॆ वा
दिनमणिमणिशृंगॆ वांतवह्निप्रदीप्तॆ ।
दधदतिकटुदंष्ट्रॆ भीषणॊज्जिह्ववक्त्रॆ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १० ॥

अधरितविबुधाब्धिध्यानधैर्यं विदीध्य-
द्विविधविबुधधीश्रद्धापितॆंद्रारिनाशम ।
विदधदतिकटाहॊद्घट्टनॊद्धाट्टहासं
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ ११ ॥

त्रिभुवनतृणमात्रत्राणतृष्णं तु नॆत्र-

www.yousigma.com

त्रयमतिलघितार्चिर्विष्टपाविष्टपादम ।
नवतररविताम्रं धारयन रूक्षवीक्षं
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १२ ॥

भ्रमदभिभवभूभृद्भूरि भूभारसद्भि-
द्भिदनवविभवभ्रूविभ्रमादभ्रशुभ्र ।
ऋभुभवभयभॆत्तर्भासि भॊ भॊ विभॊऽभी-
र्दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १३ ॥

श्रवणखचितचंचत्कुंडलॊच्चंडगंड-
भ्रुकुटिकटुललाट श्रॆष्ठनासारुणॊष्ठ ।
वरद सुरद राजत्कॆसरॊत्सारितारॆ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १४ ॥

प्रविकचकचराजद्रत्नकॊटीरशालिन
गलगतगलदुस्रॊदाररत्नांगदाढ्य ।
कनककटककांचीसिंजिनीमुद्रिकावन
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १५ ॥

अरिदरमसिखॆटौ बाणचापॆ गदां
सन्मुसलमपि कराभ्यामंकुशं पाशवर्यम ।

करयुगलधृतांत्रस्रग्विभिन्नारिवक्षॊ
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १६ ॥

चट चट चट दूरं मॊहय भ्रामयारीन
कडि कडि कडि कायं ज्वारय स्फॊटयस्व ।
जहि जहि जहि वॆगं शात्रवं सानुबंधं
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १७ ॥

विधिभवविबुधॆशभ्रामकाग्निस्फुलिंग-
प्रसविविकटदंष्ट्रॊज्जिह्ववक्त्रत्रिनॆत्र ।
कल कल कल कामं पाहि मां तॆ सुभक्तं
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १८ ॥

कुरु कुरु करुणां तां सांकुरां दैत्यपॊतॆ
दिश दिश विशदां मॆ शाश्वतीं दॆव दृष्टिम ।
जय जय जयमूर्तॆऽनार्त जॆतव्यपक्षं
दह दह नरसिंहासह्यवीर्याहितं मॆ ॥ १९ ॥

स्तुतिरियमहितघ्नी सॆविता नारसिंही
तनुरिव परिशांता मालिनी साऽभितॊऽलम ।
तदखिलगुरुमाग्र्यश्रीदरूपा लसद्भिः

www.yousigma.com

सुनियमनयकृत्यैः सद्गुणैर्नित्ययुक्ता ॥ २० ॥

लिकुचतिलकसूनुः सद्धितार्थानुसारी
नरहरिनुतिमेतां शत्रुसंहारहेतुम ।
अकृत सकलपापध्वंसिनीं यः पठेत तां
व्रजति नृहरिलोकं कामलोभाद्यसक्तः ॥ २१ ॥

॥ इति कविकुलतिलकश्रीत्रिविक्रमपंडिताचार्यविरचिता
श्रीनृसिंहस्तुतिः ॥

www.yousigma.com